अस्मिन् प्रश्नपत्रे 35 प्रश्नाः सन्ति। 7 मुद्रितपुटानि च सन्ति ।

**Sl. No.**

**Roll No.**
**अनुक्रमांङ्क.**

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

**Code No.** **58/SS/A**
**गूढसंख्या**

**Set /स्तबकः** **A**

# VEDA ADHYAYAN
# वेदाध्ययनम्
# (345)

**Day and Date of Examination**
**(परीक्षादिनं: दिनाङ्कश्च)** ______________________________

**Signature of Invigilators**
**(निरीक्षकयोः हस्ताक्षरम्)**
1. ______________________________
2. ______________________________

**सामान्य निर्देशा :**

1. अनुक्रमाङ्क : प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूंन लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# VEDA ADHYAYAN
# वेदाध्ययनम्
# (345)

परीक्षासमयावधिः (**Time**) होरात्रयम् (**3 Hrs.**)] [पूर्णाङ्का : (**Full Marks**) **100**

**निर्देशाः** (i) अस्मिन् प्रश्नपत्रे **[A]** भागे **10, [B]** भागे **10, [C]** भागे **10, [D] 5,** इति आहत्य **35** प्रश्नाः सन्ति ।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

(iii) समे प्रश्ना अनिवार्याः ।

---

**[A]** दशानां युक्तं विकल्पं चिनुत । **[10 × 1 = 10]**

**1.** बालखिल्यसूक्तान्याश्रित्य ऋग्वेदस्य सूक्तसंख्या कियती भवति।

(क) 1020

(ख) 1025

(ग) 1027

(घ) 1028

**2.** महाभाष्ये ऋग्वेदस्य कति शाखा निर्दिष्टाः।

(क) 12

(ख) 15

(ग) 18

(घ) एकमपि न

3. वेदानां सामवेदोऽस्मीति केन कीर्तितम्।

(क) अर्जुनेन

(ख) भीमेन

(ग) श्रीकृष्णेन

(घ) भीष्मेन

4. मनः केन तुल्यते।

(क) रथेन

(ख) सारथिना

(ग) अश्वैः

(घ) प्रग्रहेण

5. दोषावस्तो नाम किम्।

(क) दिने

(ख) रात्रौ

(ग) रात्रौ अहनि च

(घ) अहनि रात्रौ च

6. पुरूषस्य पद्भ्यां किमजायत।

(क) ब्राह्मणः

(ख) क्षत्रियः

(ग) वैश्यः

(घ) शूद्रः

7. _________ नः प्रथतां राध्यतां नः।

(क) मेदिनी

(ख) पृथिवी

(ग) धरित्री

(घ) वसुधा

8. सरमापणिसूक्तं दशममण्डलस्य कतमं सूक्तं भवति।

(क) 108 तमम्

(ख) 106 तमम्

(ग) 104 तमम्

(घ) 102 तमम्

9. पूर्वपदस्थः कुमारशब्दः कस्मिन् समासे प्रकृतिस्वरत्वं प्राप्नोति।

(क) तत्पुरूषे

(ख) अव्ययीभावे

(ग) कर्मधारये

(घ) बहुव्रीहौ

10. एकश्रुतिशब्दस्य विग्रहः कः भवति।

(क) एकस्य श्रुतिः

(ख) एका चासौ श्रुतिश्च

(ग) द्वयमपि शुद्धम्

(घ) न एकमपि

**[B]** दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत। **[10 × 2 = 20]**

11. ऋग्वेदस्य कति शाखाः? तासां नामानि लिखत।

12. अथर्ववेदस्य कति शाखाः साम्प्रतं प्राप्यन्ते?

13. आरण्यकं केषां ग्रन्थानां परिशिष्टभागः? अस्य मननोपयुक्तं स्थानं किम्?

14. कति प्रस्थानानि? कानि च तानि?

15. अग्निसूक्तस्य कः ऋषिः? किं च छन्दः?

16. अनुदात्तं पदमेकवर्जम् इति कीदृशं सूत्रम्? कश्च स्वरोऽनेन विधीयते?

17. द्विरूक्तस्य स्वरसाधनं कथं भवति? किं सूत्रम्?

18. ङसि परे युष्मदस्मदोः कः स्वर? किं तावत् विधायकं सूत्रम्?

19. तित्स्वरितम् इति सूत्रस्यार्थम् उदाहरणं च लिखत।

20. हि च इति सूत्रस्य कोऽर्थः? किश्चोदाहरणम्?

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त। **[10 × 4 = 40]**

**21.** लौकिकं सूक्तमाश्रित्य टीकां लिखत।

**22.** वेदा हि यज्ञार्थमभिप्रवृत्ताः इत्यस्य तात्पर्यं विवृणुत।

**23.** निरूक्तशास्त्रमाश्रित्य टीकां लिखत।

**24.** अहं पदेन केषां देवानां परामर्शः इति मन्त्रद्वारेण समुल्लिखत।

**25.** सरमापणिसंवादसक्तस्य सारं संक्षेपेण लिखत अथवा सरमायाश्चरितचित्रणं कुरूत।

**26.** नमोऽस्तु नीलग्रीवाय सहस्राक्षाय इति मन्त्रं व्याख्यात।

**27.** सन्नतरस्वरविधायकं सूत्रं सोदाहरणं व्याख्यायताम्।

**28.** उपसर्गस्वरविधायकं सूत्रं सोदाहरणं व्याख्यायताम्।

**29.** दिवो झल् इति सूत्रस्य तात्पर्य्यं लिखत।

**30.** कतरकंठः, कतरकठः इत्यनयोः स्वरविन्यासः कथमेवं भवति?

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः। **[5 × 6 = 30]**

**31.** वेदार्थावबोधे प्राधान्येन केषां वेदाङ्गशास्त्राणामुपयोगो वर्तते?

**32.** हिरण्यगर्भः समवर्तताग्रे इत्यस्य मन्त्रस्य पदपाठं स्वरसाधनं च कुरूत।

**33.** शिवशङ्कल्पसूक्तानुसारं मनसः स्वरूपं विशद्यताम्। अथवा शिवशङ्कल्पसूक्तस्य अन्तर्निहितं तात्पर्यं लिख्यताम्।

**34.** उदात्तेन सह एकादेशस्य सूत्रं सोदाहरणं व्याख्यात।

**35.** प्रातिपदिकस्वरविधायकं सूत्रं सोदाहरणं व्याख्यात।

✈ ✈ ✈